# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II**
**PAPER - IV**

**Time : 2 Hours** **(Pages 8)** **Marks : 50**

---

प्रथमः विभागः - सुगमसंस्कृतम् ।

प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४) ४

| | | | | | |
|---|---|---|---|---|---|
| १ |  | २ |  | ३ |  |
| | | | | | |
| ४ | मरीचिका  | ५ |  | | |
| | | | | | |

प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २) २

१. ६१ - २. द्वात्रिंशत् -

३. ५८ -

प्र.१ इ) स्तम्भमेलनं कुरुत । (५ तः ४) २

| | अ | ब |
|---|---|---|
| १. | द्वादशवादनम् | ११:५० |
| २. | पादोन - द्वादशवादनम् | १२:०० |
| ३. | दशोन - द्वादशवादनम् | ११:४५ |
| ४. | सार्ध - द्वादशवादनम् | १२:२० |
| ५. | विंशत्यधिक द्वादशवादनम् | १२:३० |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

| | | |
|---|---|---|
| ________ <br> ________ | ← ह्यः <br> ________ | ← अद्य <br> बुधवासरः |

**द्वितीयः विभागः - गद्यम् ।**

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

> भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत् । वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत् । भूमिम् उर्वरतमां कर्तुं प्रायतत । तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन् । स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमेण अकरोत् । अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत् । पर्जन्यानन्तरं बीजेभ्यः अङ्कुराः उद्भूताः । धान्यलाभेन सर्वे प्रजाजनाः सन्तुष्टाः च अभवन् । एषः कल्याणकारी नृपः पृथिव्यां प्रशासने अग्रणीः जनसेवाव्रती च अभवत् ।

**१. अवबोधनम् । (४ तः ३)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

पृथुभूपस्य प्रजाजनाः सन्तुष्टाः अभवन् यतः ........

(अ) ते प्रभूतं धान्यम् अलभन्त । (ब) ते प्रभूतं सुवर्णम् अलभन्त ।

**ख) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

पर्जन्यानन्तरम् अङ्कुरेभ्यः बीजानि उद्भूतानि ।

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

पृथुवैन्यः कृषिकार्यार्थं जलस्य व्यवस्थापनं कथम् अकरोत् ?

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

**२. शब्दज्ञानम् । (३ तः २)**

**क) गद्यांशतः ल्यबन्त-अव्यये चित्वा लिखत ।** १

**ख) विशेषण-विशेष्य-मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| सन्तुष्टाः | नृपः |
| प्रजाहितदक्षः | सेवकः |
| | प्रजाजनाः |

**ग) लकारं लिखत ।** १

जनाः धान्यबीजानि **अवपन्** ।

**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

| |
|---|
| प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः । मृगं तथाविधं दृष्ट्वा स उवाच, ''सखे! किमेतत् ?'' मृगेणोक्तम्, ''सुहृद्वाक्यस्य अनादरात् बद्धोऽहम् । उक्तं च -<br>सुहृदां हितकामानां यः शृणोति न भाषितम् ।<br>विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ॥''<br>काकः अब्रूत, ''स वञ्चकः क्वास्ते ?'' मृगेणोक्तम्, ''मन्मांसार्थी तिष्ठत्यत्रैव ।'' काकः उक्तवान्, ''उपायस्तावत् चिन्तनीयः ।''<br>अथ प्रभाते क्षेत्रपतिर्लगुडहस्तः आगच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम्, ''सखे मृग, त्वमात्मानं मृतवत्संदर्शय । वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे ।'' मृगस्तथैव स्थितः ।<br>क्षेत्रपतिना मृगः आलोकितः उक्तञ्च, ''आः ! स्वयं मृतोऽसि !'' सः मृगं बन्धनात् व्यमुञ्चत् । ततः काकशब्दं श्रुत्वा मृगः सत्वरं पलायितः । तमुद्दिश्य क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालस्तावद् हतः । |

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

मृगः क्षेत्रपतिना बद्धः यतः ......

(अ) मृगः क्षेत्रपतेः शत्रुः आसीत् ।

(ब) मृगः सुहृद्वाक्यस्य अनादरम् अकरोत् ।

**ख) कः कं वदति ।** १

''सः वञ्चकः क्वास्ते ?

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

शृगालः केन हतः ?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

काकः सायङ्काले मृगमन्विष्यन् आगतः ।

**२. जालरेखाचित्रं पूरयत ।** २




**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१.

(ततः प्रविशति वैखानसः, अन्यौ तापसौ च)

वैखानसः - (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्यः न हन्तव्यः । आशु प्रतिसंहर सायकम् । राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्तः - प्रतिसंहृत एषः सायकः । (यथोक्तं करोति)

वैखानसः - राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते । प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः ।

२.

शक्रः - महत्तरां भिक्षां याचे ।
कर्णः - महत्तरां भिक्षां भवते प्रदास्ये । गोसहस्रं ददामि ।
शक्रः - गोसहस्रमिति ? मुहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण, नेच्छामि ।
कर्णः - किं नेच्छति भवान् ? अपर्याप्तं कनकं ददामि ।
शक्रः - गृहीत्वा गच्छामि । नेच्छामि कर्ण, नेच्छामि ।
कर्णः - तेन हि जित्वा पृथिवीं ददामि ।
शक्रः - पृथिव्या किं करिष्यामि । नेच्छामि कर्ण, नेच्छामि ।
कर्णः - अथवा मच्छिरो ददामि ।

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१) 'तण्डुलान् आनय' इति पिता अर्णवं किमर्थम् आदिष्टवान् ?

२) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत् ?

## तृतीयः विभागः - पद्यम् ।

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

तावद् भयाद्धि भेतव्यं यावद् भयमनागतम् ।
आगतं तु भयं वीक्ष्य नरः कुर्याद् यथोचितम् ।।

उत्तमो नातिवक्ता स्यादधमो बहु भाषते ।
सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते ।।

घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम् ।
येन केन प्रकारेण प्रसिद्धः पुरुषो ।।

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

आगतं भयं वीक्ष्य नरः किं कुर्यात् ?

**ख) विशेषण-विशेष्य-मेलनं कुरुत ।** १

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| १) | आगतम् | पुरुषः |
| २) | प्रसिद्धः | भयम् |
| | | घटम् |

**ग) जालरेखाचित्रं पूरयत ।** १




**घ) पंद्याशतः तृतीया-विभक्त्यन्तपदे चित्वा लिखत ।** १

**च) सन्धिविग्रहं कुरुत ।** १

१) भयाद्धि - भयात् + ............... ।

२) स्यादधमः - ............... + अधमः ।

**प्र.३ आ) श्लोकौ शुद्धौ पूर्णौ च लिखत ।** ४

१. आत्मनो .............. साधनम् ।।

२. अल्पानामपि .............. मत्तदन्तिनः ।।

३. यादृशं .............. फलम् ।।

**प्र.३ इ) माध्यमभाषया सरलार्थं लिखत । (२ तः १)** २

१. शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।

२. मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ।।

**प्र.३ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१. 'येथे केन प्रकारेण' इति उक्तिं स्पष्टीकुरुत ।

२. वाचनमुपकारकं कथम् इति स्पष्टीकुरुत ।

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र.४ निर्दिष्टाः कृतीः कुरुत । (३ तः २)**

**अ) उपपदविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (४ तः २)** २

१. दा →

२. गम् - गच्छ् →

३. विना →

४. सह →

**आ) अनुवादं कुरुत । (४ तः २)** २

१. Animals and Birds live in the forest.

२. Which bird has green colour?

३. My notebook is white.

४. The trees tremble due to the wind.

**इ) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. रामः श्रेष्ठः **राजा** आसीत् ।

२. **कृषकः** क्षेत्रे बीजानिवपति ।

३. भारते दण्डकं नाम **वनम्** अवर्तत ।

४. सुदामा श्रीकृष्णस्य **मित्रम्** ।

**पञ्चमः विभागः - भाषाभ्यासः ।**

**प्र.५ अ) पृथक्करणम् ।**

**१. नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४)** २

( राजनि, एतानि, मह्यम्, नः, पयोमुचा )

| नाम | सर्वनाम |
|---|---|
| | |

**२. क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत । (५ तः ४)** २

( मुञ्चमानः, हरति, सृतः, देयः, अयच्छत् )

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (४ तः २)**

**१) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत । (३ तः २)** २

१. छात्रः दिनस्य ............ अध्ययनं करोति । (द्वे / द्विवारम्)

२. भोजने ............ रसाः भवन्ति । (षष्ठः / षड्)

३. वर्षस्य ............ परीक्षा भवति । (चतुर्षु / चतुर्वारं)

**२) समासविग्रहानां समासनामभिः सह मेलनं कुरुत। (६ तः ४)** २

| | समासविग्रहाः | समासनामानि |
|---|---|---|
| १. | विद्यया विहीनः। | उपपद - तत्पुरुषः समासः। |
| २. | शुकाः च सारिकाः च। | तृतीया - तत्पुरुषः समासः। |
| ३. | सर्वं जानाति इति। | इतरेतर - द्वन्द्वः समासः। |
| ४. | पुस्तकस्य पठनम्। | बहुव्रीहिः समासः। |
| ५. | कणादः नाम मुनिः। | षष्ठी - तत्पुरुषः समासः। |
| ६. | महान् भागः यस्य सः। | कर्मधारयः समासः। |

**३) समानार्थकं - विरुद्धार्थकं शब्दं लिखत। (४ तः २)** २

१. वीक्ष्य - २. गुणः ×
३. उत्तमः × ४. उचितम् -

( मञ्जूषा - दोषः, अवलोक्य, अधमः, योग्यम् )

**४) योग्यं पर्यायं चिनुत। (३ तः २)** २

क. वयं महाभागस्य नामधेयं जानीमः। (कर्तृवाच्यम् / कर्मवाच्यम्)

ख. त्वमात्मानं मृतवत् ......... । (सन्दर्शय / सन्दर्शयतु)

ग. सः एव परमः .............. । (अणवः / अणुः)

**शुभं भवतु ✌**